No. २२२४ क

Title श्रीविद्यायाः आवरणदेवतामन्त्रन्यास-ध्यानादि। प्रत्यङ्गिरामन्त्रन्यासध्यानम्

Author

Extent ८ पत्र Age

Subject तन्त्र

श्रीविद्यायाः आवरणदेवता
मंत्रन्यासध्यानादि
प्रत्यंगिरामंत्रस्यन्यासध्याने

नं० ११२४

189

5580

F - 7

Complete —

न १२५४ - क

श्री विद्यायाः आवरणदेवता मन्त्रन्यासध्याना-
दि

प्रतिष्ठु [illegible]

पत्र ८+१ = ९

तर्क

श्री विद्यायाः आवरणदेवता
मंत्रन्यासध्यानादि

प्र

श्री·
१
।

ॐ श्रीगुरवे शिवाय साम्बाय नमः अथ जपविधिः तत्रासने संशोध्य श्रीगुरून्
अभिवन्द्य भूतानपसार्य संविदं स्वीकृत्य दिग्बंधं विधाय करशुद्धिविद्यया करौ संशो
ध्य आत्मानं संरक्ष्य तत्त्वशुद्धिप्राणस्थापनमातृकापीठचक्रचक्रेश्वरीन्यासादि विधा
य स्वस्वप्रकारेणात्मार्चनं कृत्वा संकल्प्य श्रीगणपत्यादिजपे प्राणायामविनि
योगन्यासध्यानादिपूर्वकमनुष्ठीयात् ॐ १६ पूरकः ६४ कुम्भकः ३२ रेचकः ॐ
अस्य श्रीगणपतिमन्त्रस्य श्रीब्रह्माऋषिः गायत्रीछन्दः श्रीमहागणपतिर्देव
ता गं बीजं ह्रीं शक्तिः नमः कीलकं मम निर्विघ्न श्रीविद्यासाधनार्थे जपे विनि
न्यस
योगः इति कृताञ्जलिः स्मृत्वा ब्रह्मऋषये नमः शिरसि गायत्रीछन्दसे नमो मु

र्षि श्रीमहागणपतिदेवतायै नमो हृदि गं बीजाय नमो गुह्ये ह्रीं शक्तये नमः पा
दयोः नमः कीलकाय नमो नाभौ मम निर्विघ्नश्री विद्यासाधनार्थे जपे विनियोगः
सर्वांगेषु इति ऋष्यादिन्यासः गां अंगुष्ठाभ्यां नमः गीं तर्जनीभ्यां स्वाहा गूं मध्य
माभ्यां वषट् गैं अनामिकाभ्यां हुं गौं कनिष्ठिकाभ्यां वौषट् गः करतलकरपृष्ठा
भ्यां फट् इति करन्यासः गां हृदयाय नमः गीं शिरसे स्वाहा गूं शिखायै वषट् गैं
कवचाय हुं गौं नेत्रत्रयाय वौषट् गः अस्त्राय फट् इति षडंगन्यासः ॐ गजवदनम
चिन्त्यं तीक्ष्णदन्तं त्रिनेत्रं हृहड्डुदरमनन्तं दन्तमालेदधानम् परशुचषककपद्मं
द्वहस्तारविन्दं हरियुगलतिविष्टं श्रीगणेशं भजामि इति स्वहृदयकमले ध्या

भेदेन ध्यात्वा मानसोपचारैः संपूज्य ॐ मां माले माले महामाले सर्वशक्तिस्वरूपिणि चतुर्व
र्गस्त्वयि न्यस्तस्तस्मान्मे सिद्धिदा भव इति मालामादाय ह्रीं सिद्ध्यै नम इति संपूज्य गंअ
विघ्नं कुरु माले त्वमिति दक्षकरेण तां गृहीत्वा यथाशक्ति जपं कृत्वा जपान्ते मालां शि
रसि संस्थाप्य पूर्ववत्प्राणायामऋष्यादिकरषडंगन्यासध्यानानि विधाय ॐ त्वं माले
सर्वदेवानां प्रीतिदा शुभदा भव शुभं कुरुष्व मे भद्रे यशो वीर्यं च सर्वदा इति मालां शि
रस्युत्तार्य रहः संस्थाप्य ॐ गुह्यातिगुह्यगोप्ता त्वं गृहाणास्मत्कृतं जपम् सिद्धिर्भ
वतु मे देव त्वत्प्रसादाद्विनायक इति कृतजपं श्रीगणपतिवामकरे समर्प्य योनि
निमुद्रया प्रणम्य गजतुंडमुद्रां प्रदर्शयेत् ॐ अस्य श्रीवटुकभैरवमंत्रस्य ईश्वर

ऋषि र्गायत्रीछंदः श्रीवटुकभैरवोदेवता ह्रींबीजं वटुकायशक्तिः ऊरुऊरु
कीलकं ममश्रीविद्यासाधनार्थेजपेविनियोगः इतिसंस्तत्वाविन्यस्य ॐह्रांवां
इत्यादिकरांगन्यासौ अथध्यानं ॐकरकलितकपालःऊण्डलीदण्डपाणिस्तरुण
तिमिरनीलोव्यालयज्ञोपवीती कृतसमयसपर्याविघ्नविछेदहेतुर्जयतिवटु
कनाथःसिद्धिदःसाधकानाम् यथाशक्तिजप्त्वाप्राणायामादिनाजपंसमर्प्य
प्रणमेत् ॐअस्यश्रीभुवनेश्वरीमंत्रस्य दक्षिणामूर्तिऋषिःपंक्तिछंदः श्रीभु
वनेश्वरीदेवी हंबीजं ईंश॰ रंकीलकं श्रीविद्यासा॰ एवंविन्यस्य ह्रांइतिकरांगो
ॐउद्यदिनद्युतिमिंदुकिरीटांतुंगकुचांनयनत्रययुक्तांस्मेरमुखींवरदांकुश

मानसोपचार
॥ न्यास कर बेठा ध्यान
मंत्र.

श्री· इ 3

पाशाभीतिकरांप्रभजेभुवनेशीम् "इतिध्यात्वाजप्त्वासमर्प्यप्रणमेत् ॐअस्यश्रीमहा
कालभैरवमं· श्रीदक्षिणकालिकाऋ· विराट्छं· श्रीमहाकालभैरवोदे· हूंबीजं
ह्रींशक्ति स्वाहाकी· श्रीविद्यांगभूतश्रीदक्षिणकालिकासाधनार्थे· एवंविन्य
स्य हूंअं· हूंत· ह्रींम· ह्रींअना· स्वाकनि· हाकर· एवमंगानि अथध्यानं ॐश्म
शानस्थोमहारौद्रोमहाकालोदिगंबरः कपालंकर्त्रिकांवामेशूलंखट्वांगंदक्षि
णे भुजंगभूषितांगोपिभस्मास्थिमणिमण्डितः ज्वलत्पावकमध्यस्थोभस्मश
य्याव्यवस्थितः विपरीतरतांतत्रकालिकांहृदयोपरि दधानःपेयेखाद्येचचोष्यं
कृत्वापरस्परम् एवंध्यात्वामहादेविसर्वसिद्धिःप्रजायते "इतिध्यात्वाजप्त्वासम

मानसोपचार न्यास मूलमन्त्र

र्घ्यंप्रणमेत् ॐअस्यश्रीदक्षिणकालिकामं· श्रीभैरवऋ· उष्णिकछं· श्रीदक्षिणका
लिकादे· ह्रींबी· हूंश· क्रींकी· श्रीविद्यास्ता· एवमृष्यादि· क्रां इत्यादिकरांगो ॐअम्रा
म्भोदश्यामलाङ्गीमतिविकटदन्तीलोलजिह्वांजटालांमुण्डंवामेदधानांकरकमल
तलेदक्षिणेचन्द्रहासं स्रक्छिन्नंहास्रधाराधरमुखकमलांप्रेतदोर्बाह्लिकाञ्चीमाढ्वी
कोन्मत्तनेत्रांश्रवहृदयगतांनौमिकालींसकालाम्॥ इतिध्यात्वाजप्त्वासमर्प्यप्रणमेत्
ॐअस्यश्रीकामेशमं· दक्षिणामू· पंक्तिछं· श्रीकामेश्वरीदे· श्रीबीजं· ह्रींश· क्लींकी·
श्रीविद्यांगभूतश्रीबालाम्नायने· एवमृष्यादिन्या· श्रींअं· ह्रींत· क्लींम· श्रींअना· ह्रीं
कनि· क्लींकर· एवमंगानि ॐसूर्यकोटिसमानाभंचन्द्रमौलिंत्रिलोचनं वराभयत्रि

मानसोपचार
चार बार

श्री· ५

५

शूलासिकरं कामेश्वरं भजे ॥ इति ध्यात्वा जप्त्वा समर्थ्य प्रणमेत् ॐ अस्य श्रीबालात्रिपुरामं· दक्षि
णामू· पंक्तिश्छं· श्रीबालात्रिपुरादे· ऐंबी· ईँ शक्तिः ऱँ कीलकं श्रीविद्यासाधने· त्रिभिर्बीजै
र्हृदाद्यन्यासकरांगौ ध्यानं यथा ॐ अरुणकिरणजालैरंजिताशावकाशा विधृतजपवटीका
पुस्तकाभीतिहस्ता इतरकरवराढ्या फुल्लकल्हारसंस्था निवसतु हृदि बालानित्यकल्या
णशीला इति ध्यात्वा जप्त्वा समर्थ्य प्रणमेत् ॐ अस्य श्रीमत्त्रिपुरभैरवीमंत्रस्य श्रीदक्षि·
ऋषिः पंक्तिश्छं· श्रीत्रिपुरभैरवीदेवता ऐँ बीजं ईँ शक्तिः ऱँ कीलकं श्रीविद्यासा· त्रिभिः
कूटैर्हृदाद्यन्यासकरांगौ ॐ आताम्रार्कसहस्राभां स्फुरच्चन्द्रजटाकुलां किरीटरत्नविक
सच्चित्रचित्रितमौक्तिकां । वमद्रुधिरपंकाढ्यमुण्डमालावलीयुतां नयनत्रयशोभा

सांपूर्णेन्दुवदनान्वितां २ मुक्ताहारलताराजत्पीनोन्नतपयोधरां त्रिवलीखचि
तालग्नांनानाभरणभूषितां ३ रक्तांबरपरीधानांयौवनोन्मत्तरूपिणीं पुस्तकंचा
भयंवामेदक्षिणेचाक्षमालिकां ४ वरदानरतांनित्यंमहासंपत्प्रदांस्मरे इतिध्यात्वाज
न्मासमर्प्यप्रणमेत् अस्यश्रीत्रिपुरामं॰ श्रीदक्षिणा॰ पंक्तिछं॰ श्रीत्रिपुरादे॰ ऐंबी॰ ह्रीं
शक्तिः श्रींकीलकं श्रीविद्यासाधनार्थेजपेविनियोगः हृदत्रयेणहिरादृन्यांगानिध्याने
ॐलोहितांललितांचापपाशसृणीन्शरान् दधानांकामराजांकेयंत्रितांसुस्मितांस्म
रे इतिध्यात्वाजन्मासमर्प्यप्रणमेत् लक्ष्मीबीजाद्यालोपामुद्राषोडशीयम् ॐअस्यश्री
कामेश्वरमंत्रस्य श्रीदक्षि॰ ऋ॰ पंक्तिछं॰ श्रीकामेश्वरोदेवता श्रींबीजं ह्रींशक्तिः क्लींकी॰

श्री· ५ श्रीविद्यासा· ऐंअं· क्लींत· सौंःम· ऐंअ· क्लींक· सौंःकर· एवमंगानि ॐउद्यन्मार्तण्डकोटिद्युति
मरकतकलापोज्ज्वलं श्यामकण्ठं मुक्ताभस्माहिरत्नैर्विलसितवपुषं त्रीक्षणं चापबाणान्
बिभ्राणं पाशमुद्रेः स्मरणिमपि च करैर्भूषितं देवदेव्या वामांके नौमि कामेश्वरममरपतिं वि
श्वमूर्तिं त्वमूर्तिम् इति ध्यात्वा जप्तान्मसमर्प्य प्रणमेत् ॐअस्यश्रीमहात्रिपुरसुन्दरीराजरा
जेश्वरीमंत्रराजस्य श्रीदक्षिणामूर्तिर्ऋषिः पंक्तिश्छंदः श्रीमहात्रिपुरसुन्दरीराजराजे
श्वरीदेवता ऐंबीजं ईंशक्तिः ऐंकीलकं ममभोगापवर्गसिद्ध्यर्थे जपे विनियोगः इतिकृतां
जलिरेवं न्यसेत् ऐंश्रीमहात्रिपुरसुन्दरीसर्वज्ञताशक्तिधाम्ने अंगुष्ठाभ्यां नमः ऐंश्रीमहा
त्रिपुरसुंदरी नित्यतृप्ताशक्तिधाम्ने तर्जनीभ्यां स्वाहा ऐंश्रीमहात्रिपुरसुंदरी अनादिबोधश·

मध्य॰ ऐँ श्रीमहात्रिपुरसुंदरी स्वतंत्रश॰ अना॰ ऐँ श्रीमहात्रिपुरसुंदरी नित्यमलुप्तश॰
कनि॰ ऐँ श्रीमहात्रिपुरसुंदरी अनंतशक्तियान्वे करतल॰ एवंषडंगन्यासः ॐआरक्ताभां
त्रिनेत्रांमणिमुकुटवतींरत्नताटंकरम्यांहस्तांभोजैःसपाशांकुशमदनधनुःसायकैर्वि
स्फुरंतीं आपीनोत्तुंगवक्षोरुहतटविलसत्तारहारोज्ज्वलांगीं ध्यायाम्यंभोरुहस्थामरु
णनिवसनामीश्वरीमीश्वराणाम् इतिध्यात्वा मानसोपचारैःसंपूज्य मंत्रंसंस्कुर्यात् के
हंसः मूलं ३ उत्कीलनं ३ शक्त्यादिबीजपंचकंव्युत्क्रमेणोच्चार्यशक्तिकूटांतेमूलंस्म
रेदितिसंजीवनं ३ तं मूलं थंदंथंतं इतितोटिल्यं ३ कूटत्रयं भैरवशापंमोचय २ नार्ती
यें ॐ ह्रीं श्रीं इतिशापहरी १॰ ऐंसौंः श्रीं ह्रीं क्लीं ॐ ह्रीं श्रीं कुरु कुल्लायै स्वाहा इतिकुरुकुल्ला १॰

श्री॰
९
6

ऐंक्लींह्रींत्रिपुरेशिभगवतिस्वाहा इतिऊहलक्रांमूर्ध्नि ९॰ ॐइतिसेतुं ९॰ हृदि ह्रींइतिमहासे
तुं ९॰ विशुद्धौ ॐक्रंमूलंऐंग्रं ५॰ इतिनिर्वाणं ९॰ मणिपूरे ऐँनमस्त्रिपुरास्वायदहदहडरि
तुं ऐँहनहनकीलान् ऐँत्रिपुरीस्वाहा अपरमंत्रं ऐँवागीश्वरिविद्महे ऐँकामेश्वरिधीमहि
ऐँतन्नःशक्तिःप्रचोदयात् इतिमूलगायत्री ९॰ ततोमूर्ध्निश्रीगुरुंस्मेतवर्णांकण्ठेस्वर्णव
र्णांमूलविद्यांहृत्कमलेश्रीपरदेवतांयथोक्तरूपां श्रीगुरुपादुकातलेस्वात्मानं ध्यात्वाच
क्रैतेषांचतुर्णामैक्यंविभाव्य मूलंयथाशक्तिजप्त्वा प्रणवसंपुटितंमूलं श्रीकामेश्व
मंत्रंचदशवारंस्मृत्वा प्राणायामादिना समर्प्यप्रणम्यस्तवेत् ॥

ॐअस्यश्रीदुर्गाभगवतीमंत्रस्य महेश्वरऋषिःअनुष्टुप्छंदः श्रीदुर्गाभगवतीदेवता दुंबीजं
ह्रींशक्तिः ॐकीलकं भोगापवर्गसिद्ध्यर्थेपाठेविनियोगः ॐह्रां ६ इत्यादिषडंगः ॐदूर्वा
निभांत्रिनयनांविलसत्किरीटांशंखाब्जखड्गशरखेटकशूलचापान् संतर्जनीचदधतीं
महिषासनस्थांदुर्गांनवारकुलपीठगतांभजेहम् इतिध्यात्वाजपासुमर्घ्यप्रणामेत्
ॐअस्यश्रीनवार्णमंत्रस्य ब्रह्मविष्णुमहेश्वराऋषयःगायत्र्युष्णिगनुष्टुभश्छंदांसि श्रीम
हाकालीश्रीमहालक्ष्मी श्रीमहासरस्वत्योदेवता नन्दाशाकंभरीभीमाशक्तयः रक्तदं
तिकादुर्गाभ्रामर्योबीजानि अग्निवायुसूर्यास्तत्वानि चतुर्वर्गसाधनार्थेजपेविनियोगः
इतिकृतांजलिर्न्यसेत् ऐंअं· ह्रींन· क्लींम· चामुण्डायैअना· विच्चेकनि· सर्वमूलंकरत·

श्री ८

एवमंगानि अथ ध्यानानि ॐ खड्गं चक्रगदेषुचापपरिघाञ्छूलं भुशुण्डीं शिरः शंखं संदधतीं
करैस्त्रिनयनां सर्वांगभूषावृताम् यामस्तौत्स्वपिते हरौ कमलजो हन्तुं मधुं कैटभं नीलाश्म
द्युतिमास्यपाददशकां सेवे महाकालिकाम् ॐ अक्षस्रक्परशूगदेषुकुलिशं पद्मं धनुष्कु
ण्डिकां दण्डं शक्तिमसिं च चर्म जलजं घण्टां सुराभाजनम् शूलं पाशसुदर्शने च दधतीं ह
स्तैः प्रवालप्रभां सेवे सैरिभमर्दिनीमिह महालक्ष्मीं सरोजस्थितां ॐ घण्टाशूलहलानि
शंखमुसले चक्रं धनुः सायकं हस्ताब्जैर्दधतीं घनान्तविलसच्छीतांशुतुल्यप्रभां गौ
रीदेहसमुद्भवां त्रिजगतामाधारभूतां महा पूर्वामत्र सरस्वतीमनुभजे शुम्भादिदैत्या
र्दिनीम् इति ध्यात्वा जपं समर्पयेत् ॥ ॥

अस्यश्रीपृथ्वीगिरामंत्रस्य ब्रह्माऋषिः अष्टिछंदः महापर्वतमहासमुद्र महाग्नि महापृथ्वी महाकाशा
देवता ॐबीजं ह्रींशक्तिः शत्रोरमुकनाम्नोनाशनेविनियोगः अथऋष्यादिन्यासः ब्रह्माऋषयेनमः
शिरसि अष्टिछंदसेनमो मुखे महापर्वत महासमुद्र महाग्नि महापृथ्वी महाकाशदेवताभ्योनमो
12 हृदि ॐबीजायनमो गुह्ये ह्रींशक्तयेनमः पादयोः शत्रुनाशनेविनियोगः सर्वांगेषु ह्रांअंगुष्ठाभ्यांनमः
ह्रींतर्जनीभ्यांस्वाहा ह्रूंमध्यमाभ्यांवौषट् ह्रैंअनामिकाभ्यां हुं ह्रौंकनिष्ठिकाभ्यांवौषट् ह्रःकरतलकरपृ
ष्ठाभ्यांफट् इतिकरन्यासः अथषडंगन्यासः ॥ ह्रांहृदयायनमः ह्रींशिरसेस्वाहा ह्रूंशिखायैवषट् ह्रैं
कवचायहुं ह्रौंनेत्रत्रयायवौषट् ह्रःअस्त्रायफट् अथध्यानम् नानारत्नार्चिराक्रांतवृक्षाभःस्ववर्णोर्वि
तं व्याघ्रादिपशुभिर्व्याप्तंसानुशृंगगिरिंस्मरेत् १ मत्स्यकूर्मादिजीवाढ्यंनवरत्नसमन्वितम् घनछायं
सकल्लोलमकूपारंविचिंतयेत् २ ज्वालावलीसमाक्रांतजगत्त्रितयमद्भुतम् पीतवर्णंमहावह्निंसं
स्मरेच्छत्रुशांतये ३ यतासमुत्परेराव्याप्तंमलिनंरुद्धभूदिवम् पवनंसंस्मरेद्विश्वजीवनंप्राणरूपतः
४ नदीपर्वतवृक्षादिकलितग्रामसंकुला आधारभूताजगतोध्येयापृथ्वीहमंत्रिणा ५ सूर्यादिग्रहन
क्षत्रकालचक्रसमन्वितम् निर्मलंगगनंध्यायेत्स्थानादिनामाश्रयप्रदं इतिमंत्रः ॥

ॐ अं कं चं टं तं पं हं लों ह्रीं डं सः ॐ फट् स्वाहा ॥ मंत्र दशांशेन षड्द्रव्यैर्होमं समाचरेत् ७ ब्रीह्यस्तण्डुलाश्च जं सर्षपाश्च रवाक्तिला एतैर्हुत्वा यथाभागं पीठे पूर्वादितो यजेत् ॥

प्र त्यङ्गि रा मन्त्रस्य न्यास ध्या नं पत्र ९